International Journal of Sanskrit Research 2023; 9(3): 242-244

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(3): 242-244
© 2023 IJSR
www.anantaajournal.com
Received: 08-02-2023
Accepted: 15-04-2023

**मञ्जुदत्तः**
अतिथ्यध्यापिका,
योगदासत्सङ्गपालपाडामहाविद्यालयः, पूर्वमेदिनीपूरम्,
पश्चिम बंगाल, भारत

**Corresponding Author:**
**मञ्जुदत्तः**
अतिथ्यध्यापिका,
योगदासत्सङ्गपालपाडामहाविद्यालयः, पूर्वमेदिनीपूरम्,
पश्चिम बंगाल, भारत

# पाणिन्युत्तरकालीनव्याकरणचर्चायां कर्तृकारकव्याख्या

**मञ्जुदत्तः**

**सारांश**

सर्वसाहित्येषु साहित्यरचनायां व्याकरणमेव मुख्यम्। यथा मुखं विना मनुष्यः किमपि वक्तुं न शक्नोति। प्राणिनः खाद्यग्रहणं कर्तुं न पारयति। तथैव व्याकरणं विना साहित्यग्रन्थाः न चलति एव। इत्यर्थमुच्यते दृ मुखं व्याकरणं स्मृतम्। व्याकरणविषयेषु वाक्यरचनायां कारकस्य प्राधान्यमस्ति। षट्कारकानां कर्तृकारकं मुख्यम्, कर्तृप्राधान्यत्वात्। समाजे तथा साहित्ये कर्ता एव प्रधानो भवति। कर्तानुसारमेव कर्म तथा क्रिया वाक्ये व्यवहरन्ति। वैयाकरणापि कर्तुः प्राधान्यं परिलक्ष्य एव कर्तपदस्य प्रयोग कारिकायामन्तिमे व्यवहारं कृतवान्। अन्त्य प्रयोगेन गुरुत्वहीनः एवं भावना निरर्थक एव। कार्यस्य अन्त्य यदि शुभं भवति तर्हि सर्वं साधु भवति। अन्त्य प्रयोगेन गुरुत्वावहो भवति। धातोः सन्निकृष्टो भवति। अत्र प्रवन्धे कर्तृकारकस्य विषये आलोचनमस्ति।

**कूटशब्दः** सिद्धान्तकौमुदी, व्याकरणकौमुदी, सारमञ्जरी, कर्तृकारकम्।

## प्रस्तावना

प्राच्यविद्याविषयकपण्डितः वोट्लिङ्कमहोदयः (Bohtlingk) पाणिनेः कालनिरूपणे सर्वप्रथमं प्रवृत्तोऽभवत्। सोमदेवभट्टस्य *कथासरित्सागर*स्यैका आख्यायिकायां वर्षः नाम व्राह्मणं पाणिनेः गुरुः एवमुक्तवान्। ग्रन्थानुसारं चन्द्रगुप्तस्य प्राक् नरपतिः नन्दस्य शासनकाले पाटलिपुत्रनगर्यां वर्ष नाम व्राह्मणः अवसत्। आलेकजाण्डारमहोदयस्य मरणोत्तरं नरपतिचन्द्रगुप्तः आनुमानिक ईशापूर्वपञ्चदशाधिकत्रिशतवर्षपूर्वं सिंहासनमारूढवान्। आलोचनानुसारं पाणिनेः कालः ईशापूर्वपञ्चाशदधिकत्रिशतवर्षमिति मन्यते।

पाणिनेः अष्टाध्यायी सूत्रसमूहानां समावेशो भवति। विषयानुसारेण तत्र सूत्रसमूहसज्जितमसज्जितमप्यस्ति। पाणिनेरुत्तरकालीनः वैयाकरणभट्टोजीदीक्षितमहोदयः तस्य *सिद्धान्तकौमुदी* इति ग्रन्थे सन्धि-संज्ञा-कारकादिः विषयकसूत्रसमूहम् अष्टाध्यायी इति ग्रन्थस्य विविधस्थानादेकत्रीकृत्वा नवीनरूपेण सज्जितवान्। दीक्षितमहोदयस्योत्तरकाले व्याकरण कौमुदी आदिः ग्रन्थे नवीनसूत्रसज्जा अनुसृतो भवति।

पाणिनेः सूत्रक्रमोऽपि वैज्ञानिको भवति। पाणिनिसम्प्रदायः अयमेव सूत्रक्रमः रोचते,तदनुसारं पाठदानमपि करोति। पाणिनिः स्वयं सूत्रस्य कोऽपि व्याख्या उदाहरणं वा न प्रदत्तवान्। पाणिनिव्याकरणस्य द्विधारूपेणाध्ययनमध्यापनञ्च भवति – 1) अष्टाध्यायी क्रमानुसारम् –अष्टाध्यायीप्रस्थानम्। 2) उदाहरणस्य प्राधान्यं भवति – कौमुदी प्रस्थानम्, यथा – काशिकादिः। प्राक् पाणिनीयः कतिपयः वैयाकरणस्य नामोल्लेखं यद्यपि प्राप्यते, तस्य ग्रन्थः परिचयश्च न किमपि उपलभ्यते। पाणिनेरूत्तरकाले वहु व्याकरणग्रन्थाः रचिताः सन्ति। तेषां भट्टोजी दीक्षितमहाशयस्य सिद्धान्तकौमुदी, जयकृष्णविरचितः सारमञ्जरी एवञ्च विद्यासागरमहोदयस्य व्याकरण कौमुदीं ग्रहणं करोमि। ग्रन्थत्रयात् कारकांशतः केवलं कर्तृकारकं नीत्वा आलोचनं करोमि।

विद्यासागरमहोदयः विभक्तिः आलोचनान्तरं कारकवर्णनमकरोत्। अत्र अस्मिन् प्रवन्धे विभक्तिः आलोचनं न कृत्वा केवलमहं ग्रन्थत्रयानुसारं कर्तृकारकालोचनं करोमि। विद्यासागरमहोदयः सर्वप्रथमं कारकलक्षणं कृतवान्, - क्रियान्वयि कारकम्।[1] अत्रोल्लेख्य पाणिनिः तस्य अष्टाध्यायी ग्रन्थेऽपि कारकसंज्ञाविधायकः कोऽपि सूत्रं न कृतवान्। पण्डितप्रवरः पाणिनेः दीर्घसूत्रं संक्षिप्तमकरोत्।[2] व्याकरणकौमुदी चतुर्धा विभक्तो भवति। प्रथमखण्डः संज्ञा,परिभाषा,सन्धिः,शव्दरूपः,लिङ्गप्रकरणादिः। द्वितीयः तृतीयखण्डे तिङन्तप्रकरणम [3] , सनन्त-यङन्तप्रकरणम्,आत्मनेपद-परस्मैपदविधानम्,वाच्यम्, कृत्प्रकरणञ्च। चतुर्थखण्डे कारकविभक्तिः, समासः, तद्धितप्रकरणम्, स्त्रीप्रत्ययादिः आलोचनमस्ति। कारकालोचनं प्रारम्भमकरोत् अपादानकारकालोचनमाध्यमेन। अत्र संक्षिप्तसारस्यैका कारिका उल्लेखनीया –

अपादान-सम्प्रदान-करणाधारकर्म्मणाम्।
कर्त्तुश्चान्योऽन्यसन्देहे परमेकं[4] प्रवर्त्तते।।

-एकपदमवलम्व्य यदि क्रियाद्वयं प्रयुक्तो भवति तर्हि अपादानादिः क्रमे परकारकं प्रयुज्यते। पण्डितप्रवरः ईदृशकारणवशात् अपादानादिः क्रमे कारकालोचनं कृतवान् एवमहं मन्ये।

विद्यासागरमहोदयः कर्तृलक्षणं कृतवान् – क्रियासम्पादक कर्ता। अर्थात् यः अपराधीनं न भूत्वा कार्यसम्पादनं करोति, स कर्तृकारको भवति। सिद्धान्तकौमूद्यां कर्तृकारकविधायकः कोऽपि सूत्रस्योल्लेखं विश्लेषणञ्च नोपलभ्यते। अत्र सिद्धान्तकौमुद्यां कारकालोचनानन्तरं विभक्तालोचनं परिदृश्यते। यत् कारकस्य या विभक्तिः तत्रैव लिखितमस्ति। सारमञ्जर्यां कर्तृलक्षणं यथा – क्रियानुकूलकृतिमत्त्वं कर्तृत्वम्, ग्रन्थानुसारं कर्तृपदस्य यत्नार्थकतृजन्त[5]कृ-धातुव्युत्पन्नत्वात्। अतोऽन्यत्र अचेतनादौ कर्तृत्वं भाक्तमिति। अनन्तरं क्रियालक्षणे उक्तम् – धातोरर्थः क्रिया, सा च द्विधा, क्वचित्कर्तृस्था, क्वचित्कर्मस्था च। एषा खलु क्रिया धातुवाच्या फलव्यापारोभयरूपा तद्विशिष्टरूपा वा, फलव्यापारयोर्धातुः इत्यभिजनवचनात्। अत्र हरिणाऽप्युक्तम् –

व्यापारो भावना सैवोत्पादना सैव च क्रिया इति।

किञ्च –

यावत् सिद्धमसिद्धं सा साध्यत्वेन प्रतीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते।।

सिद्धं वर्तमानध्वंसप्रतियोगि, भूतकालमित्यर्थः, तद्भिन्नम् असिद्धं वर्तमानं भविष्यञ्च इत्यर्थः। तेनापचत् पक्ष्यति पचतीत्यादौ सर्वत्र साध्यत्वेन असत्वरूपत्वेनाभिधीयमाना क्रियेति क्रियाशब्दस्य रूढिरनेन प्रदर्शिता इति भावः। इतः परं विद्यासागरमहोदयः प्रयोजकश्च [6] तृतीया प्रयोज्ये [7] गत्यर्थनां कर्मसंज्ञा प्रयोज्यस्य [8] सारमञ्जर्यामस्मिन्विषये उक्तम् – तत्र गमि-पति-प्रभृतीनां कर्तृस्थैव क्रिया, तस्याः पञ्चविधकर्मान्यतमरूपत्वात्। पचि-भिदिप्रभृतीनां कर्मस्थैव क्रिया, क्वचित् अधःसन्तापनादिरूपत्वात्, क्वचित् अवयवविभागरूपत्वादिति सङ्क्षेपः। तस्याः क्रियायाः पञ्चविधकर्मणाम् उत्क्षेपणापक्षेपणादिप्रकारभेदापन्नस्वरूपाणाम्, अन्यतमरूपत्वात् कर्मविशेषस्वरूपत्वात् कर्तृस्थत्वं, तद्भिन्ननां कर्मस्थत्वम् इत्युच्यते।ज्ञानाशनार्थानाञ्च [9] शव्दकर्मकाणामकर्मकाणाञ्च [10] विभाषा हृञकृञोः [11]

[1] कारकसंज्ञा इव समाससंज्ञापि पण्डितप्रवरस्य नवसंयोजनम् – एकपदीभावः समासः।

[2] पाणिनेः प्रथमाविभक्तिसूत्रः –प्रातिपदिकार्थ------ इति, सूत्रद्वयेन विभक्तमस्ति -1)अभिधेयमात्रे प्रथमा।2)कर्तरि।

[3] विभक्तिविधायकः अष्टाध्याय्यां दशलकारस्य कृते नवप्रत्ययः निर्दिष्टमस्ति। पण्डितप्रवरः प्रत्येकलकारस्य कृते पृथक् पृथक् रूपेण प्रत्ययं निर्दिष्टमकरोत्।

[4] पाठान्तर - परमेव

[5] जन्य (मन्ये)

[6] तत्प्रयोजको हेतुश्च

7 कर्तृकरणयोस्तृतीया

8 गतिवुद्धिप्रत्यवसानार्थशव्दकर्माकर्मकाणमणिकर्ता स णौ

9 तदेव

10 तदेव

11 हृक्रोरण्यतरस्याम्

कर्मभावयोस्तृतीया [12] कर्मसंज्ञायां प्रयोज्यकर्मणोः प्रथमाद्वितीये कर्मणि। [13] निवृत्तौ च प्रवृत्तिवत् क्रियायाः, एवञ्च विवक्षावशात् कारकाणि।
अत्र सिद्धान्तकौमुदी एक टीकाग्रन्थो भवति। टीकाकारस्य स्वतन्त्रता वर्तते यत् स एकसूत्रं व्याख्या करोति अपरं न इति। परन्तु मम जिज्ञासा वर्तते कथं गति-वुद्वि------, हृक्तोर—आदयः सूत्राणि कर्मकारकमध्ये व्याख्यामकरोत्। यतो अत्र कर्तृ-कर्मादयः एकाधिक विभक्तालोचनं वर्तते ततः एतत् कर्तृ व्याख्यावसरे व्याख्येय – एवं मन्ये। यतो प्रारम्भे अस्ति अपादान सम्प्रदान इति।

**References**

1. Byakaran Kaumudi, vidyasagar, Ed. Durgacharan, Dev Sahitya Kutir pvt. Lmt. Kol; c1996, 9.
2. Sanskrita Sahiter Itihas, Dev kumar Das,1404, rpt. 1416, Sadesh, Kol, 6.
3. Paniniyam, Lahiri and Sastri, 1996, rpt. 2011, The Dhaka Students Library, Kol, 73.
4. Mahabhasya, patanjali, Ed. Satyaranjan Bandhopadhay, 1405, Sanskrita Pustak Bhandar, Kol. 6.
5. Astadhyayi, Panini, Ed. Satyanarayan Chakraborty, 2005, Sanskrita Pustak Bhandar, Kol, 6.
6. Siddhanta Kaumudi, Bhattoji Diksit, Ed. Satchidananda Mukhopadhay, 1971, rpt. 2003. Sahitya Niketan, Kol, 7.
7. Nyayakosa, Ed. Bhimacarya Jhalakikar, 3rd ed 1928, The Banaras Mercantile Co. Kol, 7.

12 कर्तृकरणयोस्तृतीया
13 वुद्धिभक्षार्थयोः शव्दकर्मकाणां निजेच्छया।
प्रयोज्यकर्मण्यन्येषां न्यस्तानां लादयो मताः।।